'तृप्नोति तृप्यतीत्येते प्रीणने श्नौ श्यनि क्रमात् ।
तृपावन्यतरस्यां णौ स्यातां तर्पति तर्पयेत ॥' (श्लो. 133) इति देवः ।

[1]तर्पक:-र्पिका, तर्पकः-र्पिका, [2]तितर्पिषकः-षिका, तितृप्सकः-प्सिका, [3]तरीतृपकः-पिका ;

[4]तर्पिता-तर्प्ता-त्रप्ता-त्री, [A]तर्पयिता-त्री, तितर्पिषिता-तितृप्सिता-त्री, तरीतृपिता-त्री ;

[5]तृप्यन्-[B]न्ती, तर्पयन्-न्ती, तितर्पिषन्-तितृप्सन्-न्ती ; —

तर्पिष्यन्-तर्प्स्यन्-[6]त्रप्स्यन्-न्ती-ती, तर्पयिष्यन्-न्ती-ती, तितर्पिषिष्यन्-तितृप्सिष्यन्-न्ती-ती ;

[7]व्यतितृप्यमाणः, तर्पयमाणः, [8]व्यतितितर्पिषमाणः-व्यतितितृप्समानः, [9]तरीतृप्यमाणः ;

---

1. 'सार्वधातुकार्धधातुकयोः' (7-3-84) इति गुणः । स च 'उरण् रपरः' (1-1-51) इति रेफविशिष्टो भवति । एवमुत्तरत्रापि ज्ञेयम् ।
2. 'एकाच उपदेशेऽनुदात्तात्' (7-2-10) इत्यत्रानिट्कारिकासु, '—लिपिं लुपिं तृप्यतिदृप्यती सृपिम् ।' (काशिका 7-2-10) इति पाठात् वलाद्यार्धधातुकेषु इडागमोऽस्य धातोर्यद्यपि न भवेत्—तथापि, 'रधादिभ्यश्च' (7-2-45) इत्यत्र पाठात् इड्विकल्पः । अनुदात्तत्वफलं तु अमागम इति ज्ञेयम् । इड्पक्षे तु—'इको झल्' (1-2-9) इति सनः कित्वान्न गुणः, नापि अमागमः, अमागमविधायके सूत्रे, 'सृजिदृशोः—' (6-1-58) इत्यतः, 'अकिति' इत्यनुवृत्तेः ।
3. 'रीगृदुपधस्य च' (7-4-90) इति रीगागमः । एवं यङन्ते सर्वत्र बोध्यम् ।
4. 'रधादिभ्यश्च' (7-2-45) इतीड्विकल्पः । इडभावपक्षे, 'अनुदात्तस्य च र्दुपधस्यान्यतरस्याम्' (6-1-59) इति अमागमविकल्पः । 'मिदचोऽन्त्यात् परः' (1-1-47) इति अम् ऋकारात् परो भवति । 'इको यणचि' (6-1-77) इति यण् । लघूपधगुणापवादोऽयममागमः । एवं तव्यदादिष्वपि ज्ञेयम् ।
5. 'दिवादिभ्यः—' (3-1-69) इति श्यन् विकरणप्रत्ययः । तस्य सार्वधातुकत्वेन ङिद्वद्भावादङ्गस्य गुणो न ।
6. स्यप्रत्ययेऽपि अकित्वात् अमागमो भवति । अमागमपक्षे रूपमेवम् ।
7. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानचि रूपम् ।
8. 'पूर्ववत् सनः' (1-3-62) इति सन्नन्तात् शानचि रूपम् ।
9. यङन्ताच्छानचि, 'ऋवर्णान्नस्य णत्वं वाच्यम्' (वा. 8-4-1) इति णत्वम् ।

A. 'दातुः स्थातुर्द्विषां मूर्ध्नि यष्टुस्तर्पयितुः पितॄन् ।' भ. का. 18.40.

B. 'रक्षारये सोऽयमनश्वराय तृप्यन्मना दत्तजनद्रुहेऽस्मै ।' धा. का. 2.64.